योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः ०६

अज्ञातलेखकः

श्रीवाल्मीकिरुवाच ।

इत्युक्ते मुनिनाथेन संदेहवति पार्थिवे ।

खेदवत्यास्थिते मौनं किंचित्कालप्रतीक्षणे ।। १

परिखिन्नासु सर्वासु राज्ञीषु नृपसद्मसु ।

स्थितासु सावधानासु रामचेष्टासु सर्वतः ।। २

एतस्मिन्नेव काले तु विश्वामित्र इति श्रुतः ।

महर्षिरभ्यगाद्द्रष्टुं तमयोध्यानराधिपम् ।। ३

तस्य यज्ञोऽथ रक्षोभिस्तथा विलुलुपे किल। ।

मायावीर्यबलोन्मत्तैर्धर्मकार्यस्य धीमतः ।। ४

रक्षार्थं तस्य यज्ञस्य द्रष्टुमैच्छत्स पार्थिवम् ।

नहि शक्नोत्यविघ्नेन समाप्तुं स मुनिः क्रतुम् ।। ५

ततस्तेषां विनाशार्थमुद्यतस्तपसां निधिः ।

विश्वामित्रो महातेजा अयोध्यामभ्यगात्पुरीम् ।। ६

स राज्ञो दर्शनाकाङ्क्षी द्वाराध्यक्षानुवाच ह ।

शीघ्रमाख्यात मां प्राप्तं कौशिकं गाधिनः सुतम् ।।७

तस्य तद्वचनं श्रुत्वा द्वास्था राजगृहं ययुः ।

संभ्रान्तमनसः सर्वे तेन वाक्येन चोदिताः ।। ८

ते गत्वा राजसदनं विश्वामित्रमृषिं ततः ।

प्राप्तमावेदयामासुः प्रतीहाराः पतेस्तदा ।। ९

अथास्थानगतं भूपं राजमण्डलमालिनम् ।

समुपेत्य त्वरायुक्तो याष्टीकोऽसौ व्यजिज्ञपत् ।। १०

देव द्वारि महातेजा बालभास्करभासुरः ।

ज्वालारुणजटाजूटः पुमाञ्छ्रीमानवस्थितः ।। ११

सभासुरपताकान्तं साश्वेभपुरुषायुधम् ।

कृतवांस्तं प्रदेशं यस्तेजोभिः कीर्णकाञ्चनम् ।। १२

वीक्ष्यमाणे तु याष्टीके निवेदयति राजनि ।

विश्वामित्रो मुनिः प्राप्त इत्यनुद्धतया गिरा ।। १३

इति याष्टीकवचनमाकर्ण्य नृपसत्तमः ।

स समन्त्री ससामन्तः प्रोत्तस्थौ हेमविष्टरात्।। १४

पदातिरेव सहसा राज्ञां वृन्देन मालितः ।

वसिष्ठवामदेवाभ्यां सह सामन्तसंस्तुतः ।। १५

जगाम तत्र यत्रासौ विश्वामित्रो महामुनिः ।

ददर्श मुनिशार्दूलं द्वारभूमाववस्थितम्।। १६

केनापि कारणेनोर्वीतलमर्कमुपागतम् ।

ब्राह्मेण तेजसाक्रान्तं क्षात्रेण च महौजसा ।। १७

जराजरठया नित्यं तपःप्रसररूक्षया ।

जटावल्या वृतस्कन्धं ससंध्याभ्रमिवाचलम् ।। १८

उपशान्तं च कान्तं च दीप्तमप्रतिघाति च ।

निभृतं चोर्जिताकारं दधानं भास्वरं वपुः ।। १९

पेशलेनातिभीमेन प्रसन्नेनाकुलेन च ।

गम्भीरेणातिपूर्णेन तेजसा रञ्जितप्रभम् ।। २०

अनन्तजीवितदशासखीमेकामनिन्दिताम् ।

धारयन्तं करे श्लक्ष्णां कुण्डीमम्लानमानसम् ।। २१

करुणाक्रान्तचेतत्तवात्प्रसन्नैर्मधुराक्षरैः ।

वीक्षणैरमृतेनेव संसिञ्चन्तमिमाः प्रजाः ।। २२

युक्तयज्ञोपवीताङ्गं धवलप्रोन्नतस्त्रुवम् ।

अनन्तं विस्मयं चान्तः प्रयच्छन्तमिवेक्षितुः ।। २३

सुनिमालोक्य भूपालो दूरादेवानताकृतिः ।

प्रणनाम गलन्मौलिमणिमानितभूतलम् ।। २४

मुनिरप्यवनीनाथं भास्वानिव शतक्रतुम् ।

तत्राभिवादयांचक्रे मधुरोदारया गिरा ।। २५

ततो वसिष्ठप्रमुखाः सर्व एव द्विजातयः ।

स्वागतादिक्रमेणैनं पूजयामासुरादृताः ।। २६

दशरथ उवाच ।

अशङ्कितोपनीतेन भास्वता दर्शनेन ते ।

साधो स्वनुगृहीताः स्मो रविणेवाम्बुजाकराः ।। २७

यदनादि यदक्षुण्णं यदपायविवर्जितम् ।

तदानन्दसुखं प्राप्तं मया त्वद्दर्शनान्मुने ।। २८

अद्य वर्तामहे नूनं धन्यानां धुरि धर्मतः ।

भवदागमनस्येमे यद्वयं लक्ष्यमागताः ।। २९

एवं प्रकथयन्तोऽत्र राजानोऽथ महर्षयः ।

आसनेषु सभास्थानमासाद्य समुपाविशन् ।। ३०

स दृष्ट्वा मालितं लक्ष्म्या भीतस्तमृषिसत्तमम् १

प्रहृष्टवदनो राजा स्वयमर्घ्यं न्यवेदयत् ।। ३१

स राज्ञः प्रतिगृह्याघ्यं शास्त्रदृष्टेन कर्मणा ।

प्रदक्षिणं प्रकुर्वन्तं राजानं पर्यपूजयत् ।। ३२

स राज्ञा पूजितस्तेन प्रहृष्टवदनस्तदा ।

कुशलं चाव्ययं चैव पर्यपृच्छन्नराधिपम् ।। ३३

वसिष्ठेन समागम्य प्रहस्य मुनिपुंगवः ।

यथार्हं चार्चयित्वैनं पप्रच्छानामयं ततः ।। ३४

क्षणं यथार्हमन्योन्यं पूजयित्वा समेत्य च ।

ते सर्वे हृष्टमनसो महाराजनिवेशने ।। ३५

यथोचितासनगता मिथः संवृद्धतेजसः ।
परस्परेण पप्रच्छुः सर्वेऽनामयमादरात् ।। ३६
उपविष्टाय तस्मै स विश्वामित्राय धीमते ।
पाद्यमर्घ्यं च गां चैव भूयोभूयो न्यवेदयत् ।। ३७
अर्चयित्वा तु विधिवद्विश्वामित्रमभाषत ।
प्राञ्जलिः प्रयतो वाक्यमिदं प्रीतमना नृपः ।। ३८
यथाऽमृतस्य संप्राप्तिर्यथा वर्षमवर्षके । -
यथान्धस्येक्षणप्राप्तिर्भवदागमनं तथा ।। ३९
यथेष्टदारसंपर्कात्पुत्रजन्माऽप्रजावतः ।
स्वप्नदृष्टार्थलाभश्च भवदागमनं तथा ।। ४०
यथेप्सितेन संयोग इष्टस्यागमनं यथा ।
प्रणष्टस्य यथा लाभो भवदागमनं तथा ।। ४१
यथा हर्षो नभोगत्या मृतस्य पुनरागमात् ।
तथा त्वदागमाद्ब्रह्मन्स्वागतं ते महामुने ।। ४२
ब्रह्मलोकनिवासो हि कस्य न प्रीतिमावहेत् ।
मुने तवागमस्तद्वत्सत्यमेव ब्रवीमि ते ।। ४३
कश्च ते परमः कामः किं च ते करवाण्यहम् ।
पात्रभूतोऽसि मे विप्र प्राप्तः परमधार्मिकः ।। ४४
पूर्वं राजर्षिशब्देन तपसा द्योतितप्रभः ।
ब्रह्मर्षित्वमनुप्राप्तः पूज्योऽसि भगवन्मया ।। ४५
गङ्गाजलाभिषेकेण यथा प्रीतिर्भवेन्मम ।
तथा त्वद्दर्शनात्प्रीतिरन्तः शीतयतीव माम् ।। ४६
विगतेच्छाभयक्रोधो वीतरागो निरामयः ।
इदमत्यद्भुतं ब्रह्मन्यद्भवान्मामुपागतः ।। ४७
शुभक्षेत्रगतं चाहमात्मानमपकल्मषम् ।
चन्द्रबिम्ब इवोन्मग्नं वेदवेद्यविदांवर ।। ४८

साक्षादिव ब्रह्मणो मे तवाभ्यागमनं मतम् ।

पूतोऽस्म्यनुगृहीतश्च तवाभ्यागमनान्मुने ।। ४९

त्वदागमनपुण्येन साधो यदनुरञ्जितम् ।

अद्य मे सफलं जन्म जीवितं तत्सुजीवितम् ।। ५०

त्वामिहाभ्यागतं दृष्ट्वा प्रतिपूज्य प्रणम्य च ।

आत्मन्येव नमाम्यन्तर्दृष्ट्वेन्दुं जलधिर्यथा ।। ५१

यत्कार्यं येन वार्थेन प्राप्तोऽसि मुनिपुङ्गव ।

कृतमित्येव तद्विद्धि मान्योऽसीति सदा मम ।। ५२

स्वकार्ये न विमर्शं त्वं कर्तुमर्हसि कौशिक ।

भगवन्नास्त्यदेयं मे त्वयि यत्प्रतिपद्यते ।। ५३

कार्यस्य न विचारं त्वं कर्तुमर्हसि धर्मतः ।

कर्ता चाहमशेषं ते दैवतं परमं भवान् ।। ५४

इदमतिमधुरं निशम्य वाक्यं श्रुतिसुखमात्मविदा विनीतमुक्तम् ।

प्रथितगुणयशागुणैर्विशिष्टं मुनिवृषभः परमं जगाम हर्षम् ।। ५५

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे विश्वामित्राभ्यागमनं नाम षष्ठः सर्गः ।। ६ ।।